ISSN 2231-6221

सामान्याऽङ्कः

पञ्चत्रिंशः

# परिशीलनम्

उत्तरप्रदेशसंस्कृतसंस्थानस्य षाण्मासिक्यनुसन्धानपत्रिका



उत्तरप्रदेश-संस्कृत-संस्थानम्, लखनऊ

Scanned with CamScanner

# संस्कृते भावात्मिका पत्रकारिता

- डॉ. ललितः पटेलः

पत्रकार का यह धर्म है कि विश्व के समाचार को वह यथावत् प्रसारित करे। पत्रकार भी मनुष्य है, उसके कुछ व्यक्तिगत विचार हो सकते हैं, किन्तु प्रचार माध्यमों से वह उन्हें प्रसारित न करे। पत्रकार को आत्मख्याति अथवा अपनी समृद्धि के लिए पत्रकारिता नहीं करनी चाहिए। प्रतिदिन की घटनाओं में वह उन्हें प्रधानता दे, जिससे राष्ट्र का गौरव, सम्मान और लाभ होता हो। जिन घटनाओं से राष्ट्र की हानि होने की सम्भावना है, वह उन्हें बाद में प्रसारित करे। पत्रकार को राष्ट्र की जनता में भावात्मक चिन्तन की धारा को बढ़ाने का उपाय करना चाहिए। आज विदेशों में भी भावात्मक पत्रकारिका के नवयुग का आरम्भ हुआ है। अतः भारतीय पत्रकार को भी इस नवीन भावात्मक युग में प्रवेश करना चाहिए। प्रस्तुत आलेख में इन्हीं भावों को बिन्दुओं में रखा गया हैं लेख की भाषा सरल, अनूदित व सामान्य है। *

**सारांशः** -सर्वविश्वस्य वृत्तस्य यथावत् प्रसारणं पत्रकारस्य धर्मः। भगवद्गीतासु लिखितरीत्या राग-द्वेषौ व्युदस्य पत्रकारेण वृत्त-सङ्ग्रहणं वृत्त-प्रसारः च कर्तव्यः। पत्रकारः अपि मनुष्यः। तस्य अपि किञ्चित् वैचारिकम् अधिष्ठानम् अवश्यं भवति। तद् वैचारिकम् अधिष्ठानं व्यक्तिगतं स्यात्। तत् तस्य वार्तासु प्रतिबिम्बितं न भवेत्। यः स्वविचाराणां प्रसाराय एव प्रचारमाध्यमस्य उपयोगं करोति सः न उत्तमः पत्रकारः। पत्रकारस्य हेतुः स्ववृत्तिद्वारा आत्मख्यातिः, आत्मसमृद्धिः वा न स्यात्, अपि तु राष्ट्रगौरववर्धकाः च प्रसङ्गाः भवन्ति। अत्र अनुदिनं दुर्घटनाः अपि भवन्ति। राष्ट्राय लज्जावहाः प्रसङ्गा अपि अत्र घटन्ते। पत्रकारेण तयोः विषये रागद्वेषौ त्यक्तव्यौ। सर्वं ज्ञापनीयम्। राष्ट्रस्य प्रगतये, राष्ट्रस्य गौरववर्धने च पत्रकारः कथं सहकर्तुं शक्नुयात्? इति चेत् एतासां वार्तानां प्रस्तुतौ विवेकेन लघ्वी अपि राष्ट्रगौरवास्पदवार्ता आदौ वक्तव्या। स्व-प्रस्तुतिकौशलेन तस्याः महत्त्वं च वर्धनीयम्। महती अपि राष्ट्राहानिकारी वार्ता पश्चात् प्रस्तोतव्या तस्याश्च महत्त्वं तृणीकर्तव्यम्। एवंकरणेन पत्रकारः राष्ट्रस्य जनतासु भावात्मकं चिन्तनं वर्धयितुम् अर्हति। भावात्मक-विचाराः भावात्मक-क्रियायाः मूलानि। भावात्मक-क्रिया भावात्मक-चरित्रस्य मूलम्। राष्ट्रस्य उत्थानाय अस्माभिः दुष्टैः सह युद्धं न करणीयम्। किन्तु शनैः शनैः साधूनां वर्तुलम् एतावद् वर्धनीयं यत् दुष्टेभ्यः क्वापि स्थानम् एव अवशिष्टं न स्यात्। इत्थं पत्रकाराः भारतं प्रगतिपथे अग्रेसरं कर्तुं शक्नुवन्ति। नैकेषु विदेशेषु इव भारते अपि भावात्मकपत्रकारितायाः विनूतनं युगं प्रारभ्येत इति आशया एतद्सम्बन्धीनि नैकानि उदाहरणानि, महतां चिन्तनानि, मानसशास्त्रीयानि तथ्यानि च अस्मिन् पत्रे प्रस्तोष्यन्ते।

**भावात्मिका पत्रकारिता-** पत्रिकायाः पत्रकारितायाः सञ्चार-माध्यमानां च लक्ष्यत्रयं वर्तते- 1. सूचनाप्रदानम् (Information), 2. मनोरञ्जनम् (Entertainment), 3. शिक्षणम्-जागृतिप्रसारः (Education)। प्रत्येकं पत्रिकायाः इहापि भवति यद् काचिद् विशिष्टा अभिनवा वार्ता[2] सर्वविधवृत्तेन सह प्रकाशिता स्यात्। एवञ्च आत्मख्यातिः, ग्राहकवृद्धिः, धनवृद्धिरपि स्यात्। तत्र प्रस्तुतौ प्रकाशने वा भवन्तु नाम भावात्मकप्रसङ्गाः उत निषेधात्मकप्रसङ्गाः। केवलं सूचनाप्रसारणं मनोरञ्जनम् इति लक्ष्यद्वयं पर्वतीकृत्य प्रवर्तन्ते अद्यत्वे पत्रकारिताः

Scanned with CamScanner

पत्रिकाः वा। एताः पत्रिकाः तत्तद्प्रदेशानुगुणं मातृभाषया, हिन्दीभाषया, आङ्ग्लभाषया च भारते प्रकाशिताः भवन्ति। तासामेव पठितारः भारते अधिकाः। संस्कृतपत्रिकाणां संस्कृतवृत्तपत्राणां प्रकाशनं तु विरलतया भवति यतो हि पठितारो विरलाः एव। तत्र अस्माकं लक्ष्यं सर्वविधवृत्तप्रकाशनं सर्वविधवार्तावहनमात्रमेव न स्याद् अपि तु राष्ट्रगौरवयुक्तेन भावात्मकप्रदर्शनेन यथावत् वृत्तस्य प्रसारणमिति। अनेन लक्ष्यभेदेन विशेषतः संस्कृतपत्रकारितायाः विशिष्टं विलक्षणं च दायित्वं निवर्तते भावात्मिका पत्रकारिता। इतरेषां पत्रकारितानां पत्रिकानां वृत्तपत्राणां च इदमेव लक्ष्यं प्रधानं स्याद् अद्यत्वे। तदर्थं किं किं करणीयं पत्रकारैः, वार्ताहरैः, लेखकैः, विचारकैः, कविभिश्च।

(1) लघ्वी अपि राष्ट्रगौरवप्रदा वार्ता रागद्वेषौ उज्जित्वाऽऽदौ प्रस्तोतव्या। तदनु विवेकपूर्वकं सर्वविधं वृत्तं ज्ञात्वा सत्यासत्यविवेकं विधाय इष्टानिष्टनिर्णयं कृत्वा कौशलपूर्वकं महतीम् अपि राष्ट्रहानिकरीं वार्तां गौणीकृत्य, तस्याश्च महत्त्वं तृणीकृत्य सा वार्ता प्रोक्तव्या प्रस्तोतव्या च। गुजराते 'दिव्यभास्कर' नामकं कश्चिद् वृत्तपत्रं वर्तते। तस्य निर्णयः यद् सोमवारस्य वृत्तपत्रे एतादृश्यः भावात्मिकाः वार्ताः प्रसङ्गाश्च प्रस्तोतव्याः। दुष्करेऽपि इदमेव पत्रकारिताव्रतं स्यात्सर्वेषां पत्रकाराणां वार्ताहराणां च। अन्यतमम् उदाहरणं वर्तते जपानदेशस्य। 'सेण्डाय' नामकं नगरम्। पञ्चचत्वारिंशद्वर्षीयः कश्चन अस्ति तत्र। तदीया पत्नी, पुत्रौ च सुनामीकारणतः मृतौ। गृहं विनष्टम्। सम्पत्तिः विनष्टा। सर्वथा अकिञ्चनः बन्धुविहीनः दुःखसागरे मग्नः च सः। तथापि स्वस्य आपणस्य पुरतः फलकं स्थापयति- ''भूकम्पः अस्माकं भूमिं कम्पयेत्, न तु जीवनोत्साहं विश्वासं वा। सुनामीद्वारा गृहादिकम् अपहृतं स्यात्, न तु धैर्यम्। अस्मदीयं नगरं पुनः निर्मामि वयम्'' इति।

(2) लघ्वी अपि महत्त्वपूर्णा वार्ता अतिप्रमुखां वार्तामपि गौणीकृत्य प्रस्तोतव्या। यथा राष्ट्रपतिमुख्यप्रधानादिमहानुभावानां, तेषाञ्च देशविदेशगमनागमनवार्तानां, स्वागतसम्मानादिसमारोहोपस्थिति-विषयकवार्तानां च स्थाने लघ्वी अपि महत्त्वपूर्णाः सामान्यजनानां गूढसिद्धयः च प्रकाशनीयाः। यथा गुजराते कस्यचिद् जनस्य मृत्तिकाशीतकनिर्माणम्, कच्छप्रदेशे कृषिसम्बन्ध्युत्पादनम् इत्यादिः।

(3) आचारः यथा अनुष्ठानविषयतां गच्छेत् तथा वार्ताः संगृह्य वृत्तपत्रेषु वार्तासु आकाशवाणीषु दूरदर्शनेषु च प्रस्तोतव्या। अर्थकेन्द्रितचिन्तनप्राबल्यात्, स्वसुखैकचिन्तनप्राधान्यात्, समाजहितपरिगणननैयून्यात् च महत् नैतिकमूल्याधःपतनं परिलक्षते अद्यत्वे। भारते तत्त्वानां श्रेष्ठता तु सर्वस्मिन् अपि काले आसीत् एव। अतः वृत्तपत्रेषु, वार्तासु, दूरदर्शनेषु, विद्युत्पत्रेषु, (E-mail) वैद्युदाणविकसञ्चारमाध्यमेषु, आचारयुक्ताः श्रेष्ठाः विषयाः प्रकाश्यताम् अनुष्ठानविषयतां च यथा गच्छेरन् तथा प्रयत्नः करणीयः पत्रकारैः। 'आचारः परमो धर्मः' इत्येतत् अस्माकम् उपदेशवचनमेव न स्यात् अपि तु अनुष्ठानविषयतां गच्छेत्, तादृशाः प्रसङ्गाः प्रयत्नपूर्वकं पत्रिकासु वृत्तपत्रेषु विषयाः भवन्तु।

(4) अत्युत्कृष्टं देशप्रेम यासु घटनासु स्यात्, ताः घटनाः उन्मादजनकतापूर्वकं मनोरञ्जनेन सह वार्तासु प्रोक्तव्याः प्रस्तोतव्याश्च। एतादृश्यः देशप्रेमयुताः घटनाः प्रकाश्यताम् आनीतायां सति समाजस्य महते लाभाय भवति। अतः समाजाय विवेकपूर्वकम् अधिकचिन्तनप्रवर्तनपूर्वकं तटस्थविश्लेषण- सहितम् अतिप्रमुखां वार्तामपि गौणीकृत्य एतादृश्यः घटनाः, अभिप्रायाः प्रसङ्गाः, लेखाश्च प्रकाशनीयाः।

सुनाम्याघातस्य सप्ताहानन्तरं सि.एन्.एन्. द्वारा स्वीये जालपुटे कश्चन लेखः प्रकाशितः अस्ति ''सुनाम्यनन्तरं जापानदेशे लुण्ठनादिकं किमर्थं नास्ति'' इति। तस्य लेखस्य अन्ते केषाञ्चित् अभिप्रायाः

Scanned with CamScanner

प्रकाशिताः सन्ति। ते च-- *जापानीयानां दृष्ट्या स्वहितात् अपि राष्ट्रहितं श्रेष्ठम्। स्वदेशस्य मानस्य रक्षणाय ते प्राणान् अपि पणीकुर्युः एव। एषा राष्ट्रभक्तिः तेषां नाडीषु एव प्रवहति। सुनाम्याघातं प्राप्तवतः देशस्य पुनर्निर्माणं कथमिति ते चिन्तयेयुः, न तु सम्पत्तेः लुण्ठनाय क्व अवसरः इति। * समग्रं जगत् अस्मान् पश्यति इति विचिन्त्य ते लुण्ठनादिषु न प्रवृत्ताः इति मा चिन्त्यताम्। दुरन्तकालेऽपि ते राष्ट्रप्रेम एव प्रदर्शयेयुः। यतो हि तेषां राष्ट्रप्रेम भवति तावत् उत्कृष्टम्। *जापानीयः स्वस्य देशस्य देशवासिनां च विषये द्रोहं कदापि न समर्थयितुं अर्हेत्। एतदस्ति भावात्मिकायाः पत्रिकायाः अत्युत्कृष्टम् उदाहरणम्। किं वयं गुजरातस्य कच्छभूकम्पकाले वा केदारनाथ- जलाप्लावकाले वा चेन्नईजलाप्लावकाले तल्लेखानुगुणं वर्ताः पत्रिकासु प्रसारितवन्तो वा?

भावात्मिकायाः पत्रकारितायाः प्रस्तुतिकाले प्रकाशनावसरे वा ध्यातव्याः अंशाः- * सूचनाप्रदानम्, शिक्षाप्रदानम्, मनोरञ्जनञ्च इति लक्ष्यत्रयं यथा प्रपूर्यते तथा भवात्मिका पत्रकारिता स्यात्। * वार्ता संपूर्णरीत्या संशोधनं कृत्वा करणीया। (यथा Zee News मध्ये आगता अपूर्णा ट्राफिकपोलिस घटना)। * अस्माकं परितः यत्किमपि जायमानं वर्तते तस्य सर्वस्य प्रस्तुतिः करणीया इति नियमः न, अपि तु ततोऽपि योग्यस्य सत्यस्य वृत्तस्य प्रस्तुत्तिः भवेत्। * तटस्थतापूर्वकं विश्लेषणं कृत्वा प्रस्तुतिः भवेत्। *वृत्तप्रस्तुतिः दर्शकानां पाठकानां च वर्धनाय, मनोरञ्जनाय केवलं न, अपि तु देशहिताय सर्वजनसुखाय सर्वजनलाभाय च स्यादिति। *समाजस्य विचित्ररूपाः अपवादरूपाः प्रसङ्गाः त्यक्तव्याः। वक्तव्याः चेत् गौणीकृत्य तृणरूपेण प्रस्तोतव्याः। *क्वचित् असत्यवृत्त निवेदने जाते सति अनुक्षणमेव क्षमायाचनापूर्वकं तद् निवारणीयम्। *गौरवयुक्ताः चलचित्र क्रीडादीनां वार्ता प्रदर्शनीया किन्तु अभिनेतृणां, क्रीडकानाम् अन्येषाञ्च अयोग्यवृत्तम्, अयोग्यजीवनायनं च मनोरञ्जनव्याजेन अद्यत्वे दूरदर्शनेषु, दैनिकपत्रेषु प्रदर्शयन्ति केचन। तत्सर्वथा त्याज्यम्। *पत्रकारैः सर्वदा चिन्तनीयं यदहं कीदृशं पत्रकारत्वम् इच्छामि भावात्मकं वा निषेधात्मकं वा? अतः गभीरतया गम्भीरतया च पत्रकारत्वं करणीयम्। यतः सहस्रशः जनाः तं वृत्तम् अनुमन्यन्ते। * सामूहिकापदाकालेऽहमपि सर्वैः जनैः सहास्मि इति भावना स्यात्। *व्यङ्ग्यात्मकं निषेधात्मकं प्रस्तुतेः कः लाभः? इति चिन्तनं भवेत् सर्वस्य पत्रकारस्य वार्ताहरस्य लेखकस्य च। *कृते असमीचीने प्रसारणे अपराधबोधोऽपि स्यात् सर्वेषां पत्रकाराणां लेखकानां च। * सर्वत्र सञ्चारमाध्यमेषु मातृभूमिनिन्दा देशतन्त्रोपहासः च वर्जनीयौ भवेताम्। *पत्रकारत्वदिशः परिवर्तनं ये नवयुवानः पत्रकाराः, लेखकाश्च सन्ति त एव कर्तुं प्रभवन्ति। ते प्रकाशकवर्यान्, पत्रिकास्वामिनः, तन्त्रीमहोदयान् च साहसपूर्वकं संसूचयिष्यन्ते यत् "वयं साहसयुक्तं, मानवीयं, सहिष्णुतासहिष्णुताशून्यं, धर्माधर्मविवादरहितं, गौरवास्पदं भावात्मकं वृत्तमेव प्रदर्शयिष्यामहे। पुनश्च इदमेव अस्माकं पत्रकारिताव्रतमस्ति। अयमेव पत्रकारधर्मः"। पुनश्च संस्कृतभाषायाः पत्रकारैः, वार्ताहरैः लेखकैः, विचारकैः, कविभिश्चापि स्वस्वसाधनशक्तिभिः भावात्मकपत्रकारितायाः कार्यमिदम् अवश्यमेव स्वीकरणीयम्, प्राणान्तं यावच्च अङ्गीकरणीयम्। अद्यत्वे काश्चन पत्रिकाः, कानिचित् वृत्तपत्राणि च भारते कार्यमिदं स्वीकृतवन्तः। तत्र भावात्मिकायां पत्रकारितायामपि याः वार्ताः आदौ 'टाईम्स ओफ इन्डिया' इत्यादिषु आङ्ग्लवृत्तपत्रेषु आङ्ग्लदूरदर्शनेषु प्रसारिताः भवन्ति, ताः एव पश्चाद् प्रादेशिकेषु स्थानिकेषु वृत्तेषु प्रसारिताः क्रियन्ते पत्रकारैः 'कलम हमारी खबरे उनकी' इति न्याय्येन। अतः संस्कृतज्ञैः पत्रकारैः एतादृशानां गौरवस्पदानां वार्तानां प्रस्तुतिः अन्वेषणं कृत्वा आदावेव करणीया। * भावात्मकपत्रकारितासन्दर्भे

(शेषांशः 118 पृष्ठे द्रष्टव्यः)

Scanned with CamScanner